रक्तदन्ता विशालाक्षी कामेशी चण्डमालिनी ॥ [६५]

विद्युज्जिह्वा डामरेशी नाटेशी नृत्यनायिका ।

नन्दी चैव महाकाल भृङ्गिणी च कुलालिका ॥ [६६]

नव नाटेश्वरी तत्र चतुःपञ्चरसान्विता ।

बहुभेदा देवदेवी भैरवाष्टकमातृकाः ॥ [६७]

नाटेश्वरेति विख्यातो भैरवाश्चक्रपालकः ।

क्षेत्रविघ्नेशवटुकयोगिनीमातृकाष्टकाः ॥ [६८]

ब्रह्माण्याद्याः प्रपूज्यन्ते कुमारी कामदा सदा ।

नृत्यमाने पुरा देवे[४३] भैरवो मातृभिर्वृतः ॥ [६९]

नृत्यभैरवनामा तु पूर्वचक्रे व्यवस्थितः ।

गणेशक्षेत्रडाकिन्यो गणास्तत्पुरुषाश्रिताः[४४] ॥ [७०]

वाममार्गे समाराध्या न तद् दक्षिणतः क्रिया ।

प्लक्षद्वीपे कुशद्वीपे बहुधाश्च तदन्वगाः ॥ [७१]

वश्याकर्षस्तम्भनं च सिद्धयस्त्वणिमादयः ।

मरीचिना समाराध्य शक्राय च प्रदत्तवान् ॥

इत्येषः पूर्व चाम्नायः प्राचीसिंहासनस्थितः ॥ [७२]

॥ इति श्रीपूर्णेश्वरी पूर्वाम्नायः[४५] ॥

---

४१ *°°वतारिणी– ख ।*

४२ *महावहाः– ख, भवावहा– ग ।*

४३ *देवः– घ ।*

४४ *°°स्मृताः– ख ।*

४५ *इति श्रीपूर्णेश्वरी पूर्वाम्नायः ॥ १ ॥ – ग, इति श्रीपूर्णेशी पूर्वाम्नायः –घ ।*

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

द्वितीयः पटलः

दक्षिणाम्नायं वक्ष्यामि महावीर्या महोल्बणा ।
अघोरभैरवोद्दिष्टा निशेशी च निरर्गला[१] ॥ [१]
निरालम्बेश्वरी नित्या अघोरं तच्छिवं विदुः ।
सिंहासनगता नित्या निशेशी रक्तचर्चिका ॥ [२]
चैतन्यभैरवी केचिद् रक्तकालीति[२] केचन ।
सुन्दरी कालिका केचिदघोरेश्वरी केचन ॥ [३]
ध्यानरूपं तु वक्ष्यामि भैरव्या याम्यदिक्स्थिता ।
नित्या निरंशनिरता निशेशी[३] निर्गुणाश्रया ॥ [४]
ऋतुनाराधिता देवी धर्मराजाय वै पुरा ।
सम्प्रदायकरेणैव देवी चैतन्यभैरवी ॥ [५]
चतुर्वेदासना देवी महाफेत्कारसंस्थिता ।
प्रज्वलन्ती चितामध्ये दक्षिणे[४] दक्षदा परा ॥ [६]
अलातचक्रवद् यस्या भ्रमन्ति शिवमालिका[५] ।
स्नायुलक्षा कृशाङ्गा च अस्थिचर्मावशेषिता[६] ॥ [७]
व्याघ्रचर्मकटिवृता नरचर्मोत्तरीयका ।
सहस्रादित्यसङ्काशा तप्तकाञ्चनसुप्रभा[७] ॥ [८]
पञ्चवक्त्रा चातिभीमा त्रिपञ्चनयनैर्युता ।
ईषद्धास्यललज्जिह्वा निम्ननाभिः कृशोदरी ॥ [९]
विकरालासनस्था च चक्रवक्रासनस्थिता ।

---

१ *नीलांगना– ख ।*
२ *काली रक्त°°– ख ।*
३ *निःशेशी– ख, निःश्रेणी– ग ।*
४ *दाक्षिण्य– ख, दाक्षिण्ये – ग ।*
५ *शिरमालिका– ग, घ ।*
६ *अस्थिचर्माविशेषिताः– घ ।*
७ *°°सप्रभा– क, ग, घ ।*

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

रौद्री भयापहा[८] घोरा चन्द्रार्द्धकृतकेतना[९] ॥ [१०][१०]

वर्वरोर्ध्वमुक्तकेशी नागराजविराजिता ।

कबन्धउष्णीषयुता ब्रह्मशीर्षशिखामणिः ॥ [११]

सद्यश्छिन्नगलद्रक्तः शिरोमालाविभूषिता ।

भुजषोडशसंयुक्ता गजकञ्चुककिङ्किणी[११] ॥ [१२]

पाशाङ्कुशकपाल[१२] च खट्वाङ्गं मुण्डडिण्डिमम् ।

खड्गखेट[१३]बाणधनु[१४]श्चक्रदण्ड[१५]कमण्डलुम् ॥ [१३]

अभयं वरदं चैव तर्जनीं विधृता करैः ।

मुदिता सिद्धिमधुना शक्तिभिः परिवारिता ॥ [१४]

हूंहूंहूङ्कारनादेन त्रासयन् देवतागणान् ।

ऋग्यजुःसामाथर्वाख्या[१६] वेदस्योपरि संस्थिता ॥ [१५]

शवरूपीमहादेवहृदयोपरिसंस्थिता ।

निशेशी च[१७] महोग्रा च[१८] दक्षिणाचारवर्जिता ॥ [१६]

ज्येष्ठानुज्येष्ठभेदोऽस्ति याम्यसिंहासनाश्रिता[१९] ।

तस्याङ्गदेवताः सर्वे बहुभेदा महोल्बणाः ॥ [१७]

जम्भिनी स्तम्भिनी तारा मोहिनी अन्धिनी शिवा ।

मृत्युञ्जया चर्चिका च सिंही दक्षिणकालिका ॥ [१८]

प्रचण्डा उग्रचण्डा च उग्रतारा कपालिनी ।

---

८ *भयावहा– ग ।*

९ *चन्द्रार्कभृतशेखरा – ख ।*

१० *यो पाठ मातृका 'ख'मा श्लोक ९।१–२ पछि रहेको छ ।*

११ *गजकुञ्जर°°–ख, गजकञ्चुकि– ग, घ ।*

१२ *पाशाङ्कुशं कपालंः–ख ।*

१३ *फेट– ख, ग, घ ।*

१४ *धनुं– ग ।*

१५ *दण्डं– ख ।*

१६ *यस पाठको स्थान मातृका 'ख' मा खाली राखिएको छ ।*

१७ *सा– ख, ग, घ ।*

१८ *सा– ग, घ ।*

१९ *°°सनस्थिता– ख, ग ।*

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

त्वरिता छिन्नशीर्षा च वगला वाक्प्रदायिनी[२०] ॥ [१९]
नीलसरस्वती भीमा त्रैलोक्यडामरेश्वरी ।
त्रैलोक्यविजया चण्डी रक्तचामुण्डभैरवी[२१] ॥ [२०]
दक्षिणाम्नायदेवेशी नानाभेदविसारिणी ।
ब्राह्म्याद्याष्टौ भैरवाष्टः क्षेत्रपालाष्ट एव च[२२] ॥ [२१]
स्वक्षेत्रनाथो वटुको गणेशो योगिनीगणाः[२३] ।
एका विभिन्नरूपा सा समयां पालनाय च ॥ [२२]
अघोरस्य गणाः सर्वे नानापारिषदावृताः[२४] ।
महाचण्डाट्टसंरावः पूरयन्तो दिगन्तराः ॥ [२३]
वेताला बहुलास्तत्र डाकिनीगणसंवृताः ।
बाललीलासमापन्ना निशाचरगणावृता ॥ [२४]
दण्डपाशोद्यतकराः सर्वसाधकसिद्धिदाः ।
शाकपुष्करद्वीपेषु साधकाभेददर्शिनी ॥ [२५]
चत्वरे गह्वरे पीठे योनिमण्डलमार्गगा ।
वामाचाररता पूज्या ह्यणिमाद्यष्टसिद्धिदा ॥
सूत्रमेतन्मया प्रोक्तं[२५] दक्षिणाम्नायसङ्गतम् ॥ [२६]

॥ इति श्रीनिशेश्वरी दक्षिणाम्नायः[२६] ॥

---

२० *तथा वरप्रदायिनी–ख ।*
२१ *रक्त चामुण्डा°– ग, रक्तचामुण्ड°– घ ।*
२२ *ब्राह्माद्या भैरवज्येष्ठः क्षेत्रपालाष्टमेव च– ख ।*
२३ *°°गणेशं योगिनीगणाः– ख ।*
२४ *°°कर्मफलप्रदाः– ख ।*
२५ *सूत्रीय ता मया प्रोक्ता– क ।*
२६ *इति श्रीपरातन्त्रे निशेश्वरी दक्षिणाम्नायः ॥ २ ॥– ख, इति दक्षिणाम्नायनिशेश्वरी– ग, इति दक्षिणाम्नायनिशेश्वरी ॥ २ ॥– घ ।*

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तृतीयः पटलः

सिंहासनं प्रतीच्यां तु सङ्क्षेपं श्रृणु पार्वति ।
अनेकशतसाहस्रं श्रीनाथेनावतारितम्[१] ॥ [१]
मन्त्रं[२] नानारहस्यं च यामलं लक्षसम्मितम् ।
स्वनाभिमथनाद् देवि स्वकीयरसना पुरा ॥ [२]
ब्रह्माण्डं गर्भतस्तस्या जातं दिव्येन योनिना ।
तदारभ्य महेशानि कुजादेवीति विग्रहा[३] ॥ [३]
ज्येष्ठबालप्रभेदेन[४] कुब्जिका लोकपूजिता ।
सद्योजातमुखोद्गीता पश्चिमाम्नायदेवता ॥ [४]
कुब्जिका जगतामाद्या महासंहाररूपिणी ।
अनन्तदेशिकैः सेव्या नित्या शिवसमागता ॥ [५]
ज्येष्ठबालप्रभेदेन बहुमार्गप्रवाहिणी ।
द्वात्रिंशता भेदयुक्ता कुब्जिका भैरवाश्रिता ॥ [६]
वृषभे संस्थितं देवं खवर्णं रूपशोभितम् ।
एकवक्त्रं त्रिनेत्रं च भुजाष्टादशधारिणम् ॥ [७]
डमरुं परशुं बाणं[५] खड्गमङ्कुशवज्रकम् ।
शङ्खं च वेणुवाद्यं[६] च वरदाभयदक्षिणे[७] ॥ [८]
वामे खट्वाङ्गशूलं च धनुः फलकपाशकम्[८] ।
घण्टाकपालवेणुं[९] च अभयाभयनाशनम् ॥ [९]

---

१ *श्रीनाथैरवतारितम्– घ ।*
२ *तन्त्रं– ग, तत्र– घ ।*
३ *विश्रुता– ग, घ ।*
४ *°°बालादिभेदेन– ग, घ ।*
५ *परशुं डमरु°° – ग, घ ।*
६ *शंखं वेणुं च°– घ ।*
७ *वरदाकरदक्षिणे – ग, घ ।*
८ *फलकपालकम्–ख ।*
९ *घण्टाकपालमालं– घ ।*

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पट्टेन बन्धितं जानु वामोरुस्था च कुब्जिका ।
एकवक्त्रा त्रिनेत्रा च अरुणा वर्णवर्णिता[१०] ॥ [१०]
द्विभुजा वरदा देवी सिंहस्थाभयदायिनी ।
नागाभरणभूषाङ्गी खण्डेन्दुकृतमस्तका[११] ॥ [११]
वर्वराकेशपाशेन चारुपीनघनस्तनी ।[१२]
सर्वाभरणसंशोभा लक्षणैश्च सुशोभिता ॥ [१२]
एवं ध्येया[१३] कुब्जमाता[१४] पश्चिमाम्नायभैरवी[१५] ।
तत्रैव बहुभेदोऽस्ति कुब्जिका कुलमार्गगा ॥ [१३]
विभिन्ना सिद्धिनाथेन श्रीनाथेनावतारिता ।
कुजेशनाथवीरेण कुजाम्नायप्रकाशिता ॥ [१४]
नवात्मा श्रीशिखानाथः स्वच्छन्दललितेश्वरः ।
क्रमेशी च त्रिखण्डा च चण्डा चण्डकपालिका ॥ [१५]
त्रिशुद्धिरुग्रचण्डा च चण्डा चण्डकपालिका ।[१६]
अन्नपूर्णा कराली च ज्वालामालिनी कामिनी [१६]
ब्राह्म्याद्या मातरगणा असिताङ्गदिभैरवाः ।
ब्राह्मी माहेश्वरी चैव कौमारी वैष्णवी तथा ॥ [१७]
वाराही चैव माहेन्द्री चामुण्डा सप्तमी स्मृता ।

---

१० वरवर्णिता– ग, घ ।

११ °°शेखरा– ग, घ ।

१२ यसपछि मातृका 'ग'को पाठको क्रम यसप्रकार रहेको छ–
कुजेशनाथवीरेण कुजाम्नायप्रकाशिता ।
एवं ध्येया कुजामाता पश्चिमाम्नायभैरवी ।
तत्रैव बहुभेदोऽस्ति कुब्जिका कुलमार्गगा ।
विभिन्ना सिद्धिनाथेन श्रीनाथेनावतारिता ।
सर्वाभरणसंशोभा लक्षणैश्च सुशोभिता ।

१३ ध्यात्वा– ख ।

१४ कुब्जिकामाता– ख ।

१५ °°नायिका– ग, घ ।

१६ यो पाठ मातृका 'ख', 'ग' र 'घ'मा छैन ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अष्टमी च महालक्ष्मीरेताः सर्वत्र पूजिताः[१७] ॥ [१८]

असिताङ्गो रुरुश्चण्डः क्रोधीशोन्मत्तकस्तथा[१८] ।

कपाली भीषणाख्यश्च संहारश्चाष्टमस्तथा ॥ [१९]

षडाम्नायप्रपूज्या वै मातृकाः सह भैरवैः ।

गणेशो वटुकः क्षेत्रयोगिनीसङ्ककाः स्मृताः ॥ [२०]

डाकिनीभूतवेतालचर्चिकागणसंवृताः[१९] ।

डाकिन्यादिमहारावः षड्योगिन्यः प्रकीर्तिताः ॥ [२१]

डाकिनी राकिनी घोरा लाकिनी काकिनी तथा ।

साकिनी हाकिनी प्रोक्ता याकिण्यः[२०] सप्तधातवः ॥ [२२]

संस्थिता देवताः पूज्याश्चरुरूपेण भैरवः ।

सद्योजातसाधिता[२१] सा[२२] कुब्जिका चक्रनायिका ॥ [२३]

अङ्गिरासाधिता विद्या[२३] दक्षाय प्रतिपालिता ।

नहुषाय ततो दत्त्वा ततश्चन्द्रान्वयाय च ॥ [२४]

पार्थिवानां च सौम्यानां कुलदेवीति कीर्तिता ।

अनेकसिद्धिदाः सर्वे क्रियास्तु बहवः स्मृताः ॥ [२५]

दुर्वासाराधिता विद्या निराचारा कलाश्रिता ।

वाममार्गे रता[२४] नित्या दक्षिणे फलवर्जिता[२५] ॥ [२६]

मकारपञ्चकैः पूज्या नान्यथा फलदा भवेत् ।

शौचाचारो निराचारो निष्कलङ्का निराश्रया ॥ [२७]

अणिमादिमहासिद्धिः साधनाच्छीघ्रसिद्धिदा ।

---

१७ *सर्वाः प्रपूजयेत्– ग, सर्वत्र पूजयेत्– घ ।*

१८ *क्रोधीशोन्मत्तकौ°– ग ।*

१९ *°°चेटिका°– ग ।*

२० *याकिणी– ग ।*

२१ *°°पूजिता– ग, घ ।*

२२ *तु– ग ।*

२३ *पूर्वे – घ ।*

२४ *वाममार्गरता– घ ।*

२५ *दक्षिणा फलपूजिता– ख ।*

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मोक्षदा भोगदा देवी कुब्जिका कुलमातृका ॥ [२८]

बहुधा वर्णिता देवि तवाग्रे श्रीमतादिषु ।

मन्थानभैरवे चास्ति चतुर्विंशमतेषु[२६] च ॥ [२९]

॥ इति श्रीपश्चिमसिंहासनकुब्जिका[२७] ॥

२६ *चतुर्विंशतिकेषु– ग, घ ।*

२७ *पश्चिमसिंहासनं– ग, इति पश्चिमसिंहासनं ॥३॥– घ ।*

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

चतुर्थः पटलः

वामदेवाश्रिताम्नायं कथयामि तवाग्रतः ।
उग्राम्नायमुत्तरं तु[१] कालीकुलसमुद्भवा ॥ [१]
कोटिकोटिप्रभेदोऽस्ति कालिका तीव्रनायिका[२] ।
आज्ञासिद्धिप्रदा देवी विष्णुतेजोपबृंहिता ॥ [२]
नारायणी महाकाली जगद्रक्षणतत्परा ।
काली काली महाकाली चण्डयोगेश्वरीति च ॥ [३]
तिष्ठन् गच्छन् स्मरेन्नित्यं[३] मुच्यते महतो भयात् ।
आब्रह्मस्थावरान्तं च कालेन कलयन्ति च ॥ [४]
तं कालं कलयेत् काली ततः सा कालिका स्मृता ।
अनेकचक्रचक्रेशी नानाभेदा महागमाः[४] ॥ [५]
शक्यते कालिका देव्या देवा ब्रह्मादयोऽपि हि ।
तथापि लेशमात्रं तु कुमारीक्रमतः श्रृणु ॥ [६]
नीलवर्णा महाकाली त्रिमुखा नवलोचना ।
पीतं[५] तु दक्षिणं वक्त्रमुत्तरं पावकोपमम् ॥ [७]
मुण्डलम्बितनेत्रं च[६] अष्टबाह्वी तनूपरा[७] ।
पिङ्गलोर्ध्वजटाटोपचन्द्रार्द्धकृतशेखरा ॥ [८]
सप्तविंशतिमुण्डाश्च[८] रक्तविप्रुषसंयुताः ।
अस्थिकुण्डलशोभाढ्या मौलीकापालमालिनी ॥ [९]

---

१ च– ग, घ ।
२ ऊर्ध्वमिश्रिता, ग ।
३ स्मरन्°– ग,घ ।
४ नानाभेदमहागमाः– ग, घ ।
५ पीठं– ख ।
६ तु– ग, घ ।
७ °°धरा– ख, ग, धनुर्धरा– घ ।
८ मुण्डं च– घ ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

किङ्किणीनौपुराराववीरघण्टारवोत्तमा[९] ।
शिवप्रेतसमारूढा मुखशोणितनिर्भरा ॥ [१०]
इन्द्राद्या ब्रह्मविष्णुश्च रुद्रेश्वरसदाशिवाः ।
पीतश्यामरक्तधूम्रश्वेताभाः पञ्चकालिकाः[१०] ॥ [११]
वज्रदण्डशक्तिशूलखट्वाङ्गायुधधारकाः ।
तर्जनीमुखनिक्षिप्ता शिवाधस्था त्रिलोचना ॥ [१२]
बद्धपद्मासना देवी पीनोन्नतपयोधरा ।
वामहस्ते कपालं च रक्तपूर्णालिशोभना[११] ॥ [१३]
धारयन्ती त्रिशूलं च सशब्दं दक्षिणे करे ।
चक्रं च दक्षिणे हस्ते अङ्कुशं मुद्गरं तथा ॥ [१४]
वामे पाशं च खट्वाङ्गं मृतबालं च धारिणी ।
चित्कला कुलमध्यस्था ज्योतिरूपा च केवला ॥ [१५]
निर्वाणपददातीता भावातीता अगोचरा ।
अस्यां मूर्तौ महादेव्या नववक्त्राणि पूजयेत् ॥ [१६]
बहूनि भेदरूपाणि कालिकाया महेश्वरि ।
आज्ञासिद्धिप्रदा नित्या कौलमार्गप्रवर्तिका[१२] ॥ [१७]
महाकुलालिका याता विष्णुकालित्वमागता ।
यस्याः प्रभावमतुलं वर्णितुं नैव शक्यते ॥ [१८]
दुर्वासा नारदो व्यासो वसिष्ठः कौशिकस्तथा ।
त्रिचतुः पञ्चसप्ताहादेकाहात् सिद्धिमागता ॥ [१९]
अणिमाद्या महासिद्धिस्तस्याङ्गसिद्धयः स्मृताः ।
मोक्षदा सिद्धिदा काली निर्वाणेशीश्वरी शिवा[१३] ॥ [२०]
कैवल्यमेका सिद्धिः स्यान्महाज्ञानप्रकाशिनी ।

---

९ °°त्तरा– ग, घ ।
१० °°प्रेतकाः– ग ।
११ °°तिशोभना– ग ।
१२ प्रवर्तका– क, ग, कौलिका मार्गवर्तका– घ ।
१३ °°परेश्वरी– ख ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

साधको भैरवः साक्षाज्जरामरणवर्जितः ॥ [२१]

धनदस्य न सा भूतिर्न शक्रस्य प्रजापतेः ।

या भूतिः साधकस्यैव भवेत् त्रैलोक्यदुर्लभा ॥ [२२]

पञ्चचक्रक्रमं[१४] देवि पञ्चकाल्यानुशासिता[१५] ।

गुह्यकाली महादेवी वैष्णवी ब्रह्मरूपिणी ॥ [२३]

वामदेवाश्रिता सर्वे महाभैरवकोटयः ।

गणेशवटुयोगिन्यः शतकोटिसहस्रकम्[१६] ॥ [२४]

भूतवेतालडाकिन्यश्चेटका[१७] राक्षसाः खगाः ।

फेरवाः काकगृध्राश्च उलूका गरुडा वकाः ॥ [२५]

श्रृगालिकङ्कटियुगा नानारूपा महाबलाः ।

आम्नायज्ञा वदन्तीह उत्तरं तु निरुत्तरम् ॥ [२६]

॥ इति श्रीपरातन्त्रे उत्तराम्नायकालिक्रमः[१८] ॥

---

१४ पञ्चपञ्चक्रमं– ग ।

१५ °°शासिनी– ग, घ ।

१६ °°सहस्रकाः– क ।

१७ °°वटुका– ग ।

१८ इत्युत्तराम्नायकालिक्रमः ॥ ४ ॥– ग, इति उत्तराम्नायकालिक्रमः ॥– घ ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पञ्चमः पटलः

ऊर्ध्वसिंहासनं[१] वक्ष्ये त्रैलोक्यैश्वर्यसूचकम्[२] ।
सर्वचक्रेश्वरी नित्या सर्वाम्नायप्रपूजिता ॥ [१]
सर्वसिंहासनमयी ईशानासनसंस्थिता ।
परं ब्रह्मेश्वरी माया देवी नारायणी स्मृता ॥ [२]
निद्रा बुद्धिः क्षमा क्षान्तिः क्षुधा लज्जा स्मृतिर्धृतिः ।
प्रज्ञा शान्तिः प्रभा ज्योतिर्यस्याः[३] पादाङ्गुलीनखे ॥ [३]
यस्याः दृग्ज्ञानमात्रेण[४] साक्षाल्लक्ष्मीपतिर्भवेत् ।
यस्यार्चाकर्मसु रता यस्या मार्गानुसारिणः[५] ॥ [४]
राजराजसमा भूत्वा सुरराजसमाश्च वा[६] ।
भुक्त्वा तु विपुलान् भोगानन्ते निर्वाणमाप्नुयात् ॥ [५]
कदाचिद् योषितो भूत्वा कदाचित् पुरुषो भवेत् ।
विष्णुरूपेण सकलं दुष्टान् सर्वान् विनाशयेत् ॥ [६]
जगद्व्याप्तवती माया मोहयेत् स सुरासुरान् ।[७]
अरूपा रूपिणी भूत्वा सुन्दरि कथयामि ते[८] ॥ [७]
पद्मरागप्रतीकाशा कुङ्कुमोदकसन्निभा ।
सुभ्रुवा च सुनेत्रा च सुस्तनी चारुहासिनी ॥ [८][९]
कृशमध्या चतुर्बाह्वी खण्डेन्दुकृतशेखरा[१०] ।

---

१ *ऊर्ध्व°°– ख ।*
२ *त्रैलोक्ये सूर्य°°– ख । °°सूचिकम्-घ ।*
३ *जतिस्तस्याः– ग, घ ।*
४ *स्मरणमात्रेण– ख, घ ।*
५ *मार्गानुसारिणः] संशोधित पाठ । मार्गानुसारिणी– क, ख, ग, घ ।*
६ *सुरराजसमोपि वा - घ ।*
७ *७।१–२ को मोहयेत् स सुरासुरान्देखि १२।३–४ को बहुरूपासम्मको पाठ मातृका 'घ'मा छैन ।*
८ *सुस्तनी चारुहासिनी– ग ।*
९ *८ श्लोकको पाठ मातृका 'ख' र 'ग' मा छैन ।*
१० *°°शेखरी– ख ।*

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

त्रिनेत्रा सर्वभूषाढ्या[११] चारुवेशा मनोरमा[१२] ॥ [९]
पाशाङ्कुशेक्षुचापं च पञ्चबाणधनुर्धरा ।
ब्रह्म–विष्णुः–रुद्रः–ईशाः पञ्चमण्डपपादिका[१३] ॥ [१०]
सदाशिवाख्यपर्यङ्के संस्थिता परमेश्वरी ।
पराशक्तिः सुन्दरीति त्रिपुरेशीति गीयते ॥ [११]
महामोक्षप्रदा देवी परं ब्रह्मस्वरूपिणी ।
बहुभेदा विशालाक्षा बहुरूपा प्रकाशिनी ॥ [१२]
कामेश्वरी रुद्रशक्तिः पूर्णपीठावतारिणी[१४] ।
वज्रेशी वैष्णवी नित्या कामरूपनिवासिता ॥ [१३]
शक्तीश्वरी भगेशी च जालन्धरप्रतिष्ठिता ।
ब्रह्मशक्तिसमुल्लासपीठगह्वरविग्रहा ॥ [१४]
उड्यानपीठनिलया परं ब्रह्मात्मिका शिवा ।[१५]
सर्वचक्रेश्वरी सर्वपीठेशी मन्त्रविग्रहा ॥ [१५]
सर्वमन्त्रेश्वरी सर्वदेवेशी दिव्यविग्रहा ।[१६]
षडाम्नायेश्वरी नित्या निरंशा निष्परिग्रहा[१७] ॥ [१६]
नित्या षोडशविद्या या नवचक्रे व्यवस्थिता ।
नवचक्रेश्वरी नित्या नवकोणाग्रतः स्थिता ॥ [१७]
त्रैलोक्यमोहनं चक्रं सर्वाशापरिपूरकम् ।
सर्वसङ्क्षोभणं[१८] चक्रं सर्वसौभाग्यदायकम् ॥ [१८]

---

११ °°भूषाङ्गी– ग ।

१२ चारुवेशमनोरमा– ग ।

१३ मञ्च°° – क, पञ्चपादे समाश्रिता– ग ।

१४ °°वतारिता– ग, घ ।

१५ यसपछि मातृका 'ग' र 'घ'मा तलको पाठ छ–
पीठेश्वरी मन्त्रमाता सर्वेशी सर्वविग्रहा ।

१६ १५/१–२ र १६/१–२ पाठ मातृका 'ग' र 'घ'मा छैन ।

१७ निष्परिग्रहा] संशोधित पाठ । निःपरिग्रहा– क, ख, ग, घ ।

१८ सर्वसंस्तम्भनं– ग ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सर्वार्थसाधकं चक्रं सर्वरक्षाकर[१९] परम् ।
सर्वकामप्रदं चक्रं सर्वसिद्धिप्रदायकम् ॥ [१९]
सर्वानन्दमयं चक्रं नवमं चक्रनायिका[२०] ।
सर्वे तद्बैन्दवे[२१] लीना तच्छ्रीचक्रमुदाहृतम् ॥ [२०]
त्रिपुरा त्रिपुरेशी च सुन्दरी पुरवासिनी ।
श्रीर्मालिनी च सिद्धाम्बा महात्रिपुरभैरवी[२२] ॥ [२१]
अनेकदेवतावृन्द लीनाश्चक्रेषु[२३] संस्थिता ।
बैन्दवे च त्रिकोणे च अन्तरालेऽष्टकोणके ॥ [२२]
द्विदशारे च मन्वस्रे नागपत्रेषु सर्वतः ।
पत्रे षोडशसङ्ख्याते[२४] चतुरस्रे गुणस्पृहम्[२५] ॥ [२३]
रेखायुक्तचतुर्द्वारे[२६] त्रैलोक्यं तत्र पार्वति ।
हिरण्ये रजते ताम्रे मणौ पत्रेऽथ[२७] भूर्जके ॥ [२४]
कौशेयस्थण्डिले[२८] वापि[२९] दृष्ट्वा तु प्रणमेत्[३०] प्रिये ।
सर्वतीर्थेषु सुस्नातः[३१] सर्वयज्ञेषु दीक्षितः ॥ [२५]
सर्वदः सर्ववित् साक्षान्महेश्वरसमो भवेत् ।
श्रीचक्रं कारयित्वा तु यो[३२] दद्यात् साधकाय च ॥ [२६]

---

१९ *सर्वार्थसाधनं– क, ख ।*
२० *चक्रव्यवस्थिता– ख ।*
२१ *तत्सर्वे°– ग, घ ।*
२२ *°°सुन्दरी– ग ।*
२३ *ताराचक्रेषु– ख ।*
२४ *पत्रषोडश°– घ ।*
२५ *गुणं स्पृशेत्– ग,घ ।*
२६ *रक्षायुक्त°– ख रक्षायुक्तं चतुर्द्वारं– घ ।*
२७ *पट्टे°– ख ।*
२८ *कौशे च स्थण्डिले– घ ।*
२९ *चापि– ख ।*
३० *परमे– ग ।*
३१ *सस्नातः– क, ग, संस्नात्वा– घ ।*
३२ *श्री– ख ।*

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

भूचक्रं तेन दत्तं हि सशैलवनकाननम्[३३] ।
स वै महापाशुपतः स वै वैष्णवसत्तमः ॥ [२७]
सर्वदः सर्वदर्शी च ब्रह्मज्ञानी स वै सुधीः ।
महादानानि प्रोक्तानि मुनिभिर्ब्रह्मवादिभिः ॥ [२८]
तत्फलं लभते नूनं श्रीचक्रस्य प्रभावतः ।
कोटिलिङ्गप्रतिष्ठस्य यत्फलं समुदाहृतम् ॥ [२९]
तत्फलं लभते नूनं श्रीचक्रस्य प्रपूजने[३४] ।
विष्णुकोटिप्रतिष्ठायाः फलं प्राप्नोति निश्चितम् ॥ [३०]
हिरण्ये रजते ताम्रे मणौ भूर्जे च पट्टके[३५] ।
अङ्कित्वा धारयेद् यस्तु करे[३६] कण्ठे भुजेऽपि वा ॥ [३१]
यानि कानि च पापानि ब्रह्महत्यासमानि[३७] च ।
मुच्यते सर्वपापेभ्यः श्रीचक्रस्य च[३८] धारणात् ॥ [३२]
पापानि विलयं यान्ति ज्ञाताज्ञातकृतानि च ।
सर्व सन्दह्यते शीघ्रं चक्रराजस्य धारणात् ॥ [३३][३९]
भूतप्रेतपिशाचैश्च श्वापदैर्ब्रह्मराक्षसैः ।
डाकिनीशाकिनीभिर्वा वीक्षितुं नैव शक्यते ॥ [३४]
महाक्रूरग्रहैर्वापि जन्मस्थानस्थितोऽपि वा ।
गोचरे लग्नगे वापि सर्वं शुभग्रहं भवेत् ॥ [३५]
अकालमृत्युं हरति सदा सन्निहिता परा ।
परा सन्निहिता यत्र किं कुर्वन्त्यन्यदेवताः ॥ [३६]
श्रीचक्रं धारयित्वा तु यस्तु प्राणान् परित्यजेत्[४०] ।

---

३३ *सशैलवनकानना– क, ख ।*
३४ *च पूजने– ख, श्रीचक्रपरिपूजने– ग ।*
३५ *°°पट्टे च स्थण्डिले – ग, घ ।*
३६ *चक्रे– ख ।*
३७ *°°शतानि– घ ।*
३८ *मातृका 'क'मा च पाठ छैन ।*
३९ *श्लोक ३३ को पाठ मातृका 'ख' र 'ग' मा छैन ।*
४० *त्यजेद् बुधः– ग ।*

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कीकटे चान्तरीक्षे वा निषिद्धे कश्मलेऽपि वा ॥ [३७]
कृत्वा चेन्द्रियलौल्येन पापानि सुबहून्यपि ।
स कैवल्यं लभेन्नूनं न पुनर्जन्मभाग् भवेत् ॥ [३८]
यमदूताः पलायन्ते दृष्ट्वा श्रीचक्रधारिणम् ।
ब्रह्मज्ञानेन वा मोक्षः काश्यां वा यस्तनुं त्यजेत् ॥ [३९]
श्रीचक्रधारणाद् वापि त्रयो[४१] मोक्षस्य कारणम् ।
सर्वदेवगणास्तत्र सर्वधर्माश्च तत्र वै ॥ [४०]
गङ्गाद्याः सरितः सर्वे पुष्कराद्या जलाश्रिताः ।
पुरुषोत्तममुख्याश्च क्षेत्रानन्दवनादयः ॥ [४१]
वाजिमेधादियज्ञस्य फलं त्वविकलं भवेत् ।
वामदक्षिणयोगेन सुन्दरी द्विविधा स्मृता ॥ [४२][४२]
सुन्दरी द्विविधा प्रोक्ता वामदक्षिणशासने ।
अचिरेण भवेद् वामः सर्वकामान्न संशयः ॥ [४३]
दक्षिणाचारयोगेन भिक्षूणां परमा स्मृता[४३] ।
तदन्याचारयोगेन आशु सिद्धिफलं लभेत्[४४] ॥ [४४]
वेदोक्तैर्दक्षिणाचारैः कैवल्यं केवलं फलम् ।[४५]
अत एव महादेवि साक्षाद् ब्रह्मस्वरूपिणी ॥ [४५]
शब्दब्रह्म–परब्रह्मरूपिणी परमेश्वरी ।
शब्दब्रह्मं विजानीहि साक्षाद् वर्णस्वरूपिणी ॥ [४६][४६]
षोडशार्णा महादेवी वाच्यरूपेण संस्थिता ।
तुरीया सा महाविद्या साक्षाज्जाग्रत्स्वरूपिणी ॥ [४७]
वक्त्रकोटिसहस्रैस्तु जिह्वाकोटिशतैरपि ।

---

४१ *त्रयं– ग ।*
४२ *यो पाठ मातृका 'घ'मा छैन ।*
४३ *°°केवलं भवेत्– ग, कैवल्यं केवलं जपेत्– घ ।*
४४ *शीघ्रं सिद्धिं प्रयच्छति– ग, घ ।*
४५ *श्रुतिस्मृत्यनुयोगेन ब्रह्मत्वं च प्रयच्छति– ग, घ ।*
४६ *शब्दब्रह्ममयी साक्षाद्रूपिणी परमेश्वरी ।*
शब्दब्रह्मं विजानीहि साक्षाद् ब्रह्मस्वरूपिणी– ग, घ ।

 CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वर्णितुं नैव शक्नोति श्रीविद्याषोडशाक्षरीम् ॥ [४८]
ब्रह्मविद्यास्वरूपा सा भुक्तिमुक्तिफलप्रदा ।
एकोच्चारेण देवेशि राजसूयस्य कोटयः[४७] ॥ [४९]
षोडशार्णा महाविद्या न प्रकाश्या कदाचन ।
विना गुरुप्रसादेन श्रीविद्याषोडशाक्षरीम्[४८] ॥ [५०]
दृष्ट्वा प्रजपते यस्तु स भक्षो योगिनीगणैः ।
श्रीगुरोः कृपया लब्ध्वा न प्रकाश्या कदाचन ॥ [५१]
विना गुरुप्रसादेन जपेन्नैव कदाचन ।[४९]
श्रीगुरोः कृपया लब्ध्वा सर्वसाम्राज्यदायिनी ॥ [५२]
सुधातरङ्गिणीवेगशब्दचातुर्यदायिनी ।
सौभाग्यभोगसम्पन्ना[५०] कलाकुशलदायिनी ॥ [५३]
भुवनत्रयसौभाग्यं त्रैलोक्याकर्षणं तथा ।
परब्रह्मणि लीनत्वं ददाति पदमुत्तमम्[५१] ॥ [५४]
षोडशार्णा महाविद्या भुक्तिमुक्तिफलप्रदा ।
निःसरन्ति महाविद्या विस्फुलिङ्गा यथा प्रिये ॥ [५५][५२]
साक्षात् संविन्मयी नित्या[५३] ज्ञानमोक्षप्रदायिनी ।
महासम्पत्प्रदा विद्या साक्षादक्षररूपिणी ॥ [५६]
षोडशार्णा महाविद्या श्रीविद्या कथिता पुरा ।
निधीनां[५४] रक्षणं कार्यं चौरेभ्यस्तु यथा प्रिये ॥ [५७][५५]
प्राणेनापि रक्षणीया श्रीविद्या षोडशाक्षरी ।

---

४७ *एकोच्चारेण गिरिजे ब्रह्मत्वं लभते ध्रुवम्– ग, घ ।*
४८ *°°गुरुप्रसादाद् वै न जपेद् वै कदाचन– ग, घ ।*
४९ *यो पाठ मातृका 'ग'मा छैन ।*
५० *सौभाग्यभोग्य°– ख ।*
५१ *यश उत्तमम्–क, तेज उत्तमम्– ग ।*
५२ *यो पाठ मातृका 'ग'मा छैन, ५०।१–२देखि ५४।३–४सम्मको पाठ मातृका 'घ'मा छैन ।*
५३ *विद्या– ख ।*
५४ *निधानं– ग ।*
५५ *५५।३–४देखि ५६।३–४सम्मको पाठ मातृका 'घ'मा छैन ।*

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

न देया यस्य कस्यापि देया प्राणप्रदायिनी ॥ [५८][५६]

राज्ञे राज्यं प्रदेयं वै प्राणेभ्योऽप्यधिकाय[५७] च ।

सौवर्णं राजतं ताम्रं श्रेष्ठं मध्यमथाधमम् ॥ [५९]

ताम्रं[५८] लक्षगुणं प्रोक्तं रौप्यं[५९] कोटिगुणं भवेत् ।

सौवर्णानन्तफलदमथासौ[६०] किं ब्रवीमि ते ॥ [६०]

बाला सा प्रथमा विद्या[६१] ततो वाग्भैरवी स्मृता ।

सम्पत्प्रदा श्रीपदा च ततस्त्रिपुरभैरवी ॥ [६१]

बिन्दुमालिनी चिल्लेखा हृल्लेखा श्रीपराकला ।

षट्कूटा नवकूटा च लोपामुद्रा त्रिकूटिका ॥ [६२]

पञ्चमी पञ्चकामिन्यो[६२] विद्या श्रीकामराजकम् ।

षोडशार्णा महाविद्या[६३] सा वै श्रीपरमा परा[६४] ॥ [६३]

परायुक्तश्च प्रासादः शाम्भवं समुदाहृतम् ।

अणिमाद्या महासिद्धिरन्तराया प्रकीर्तिता ॥ [६४]

पञ्चसिंहासने सेव्या महात्रिपुरसुन्दरी ।

साक्षाज्जाग्रत्स्वरूपा च वैष्णवी परदेवता ॥ [६५]

सर्वस्वरूपिणी[६५] सत्या[६६] प्रकृतिः परमेश्वरी ।

सर्वजीवस्वरूपा च व्याप्य सर्वत्र संस्थिता[६७] ॥ [६६]

शिवशक्तिवचो नास्ति पुमान्न स्त्रीनपुंसकः ।

---

५६ *यो पाठ मातृका 'घ'मा छैन ।*

५७ *प्राणेभ्योऽपि प्रियाय– ग, घ ।*

५८ *ताम्रे– ग ।*

५९ *रौप्ये– ग ।*

६० *सौवर्णेऽनन्त°– ग ।*

६१ *भेदा– ग, घ ।*

६२ *पञ्चकान्यस्य– ख ।*

६३ *पराविद्या– ग ।*

६४ *श्रीपरमेश्वरी ग ।*

६५ *सर्वा सा रूपिणी– ख ।*

६६ *नित्या– घ ।*

६७ *आत्मलिङ्गस्वरूपिणी– ख, स्वात्मलिङ्गस्वरूपिणी– ग ।*

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सर्वजीवस्वरूपा च स्वात्मलिङ्गस्वरूपिणी ॥ [६७]

सर्वोत्पत्तिहेतुभूता योनिरित्यभिधीयते ।

सिंहासनस्वरूपा या ऊर्ध्वाम्नायं मयोदितम् ॥ [६८]

॥ इति श्रीभैरवश्रोतसि शिरश्छेदे महाकरवीरयागे परातन्त्रे श्रीविद्या ऊर्ध्वाम्नायः[६८] ॥

६८ इति श्री परातन्त्रे श्रीविद्या ऊर्ध्वाम्नायः ॥-ख, इति पञ्चसिंहासनी श्रीविद्याा ॥ ५ ॥–ग, पञ्चसिंहासनीश्रीविद्या– घ ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

षष्ठः पटलः

अथाम्नायं श्रृणुष्व त्वं सावरी जिनमातृका ।

अशेषकर्मनिर्माणा कलौ शीघ्रफलप्रदा ॥ [१]

बौद्धमार्गे निरातङ्का निरर्गलानलप्रभा[१] ।

आम्नायान्तरसाराणि ख्याता सा वज्रयोगिनी ॥ [२]

त्रिवक्त्रा रक्तवर्णा च[२] नृत्यपादा[३] शवासना ।

त्रिनेत्रा मुण्डलम्बीतहाराभरणभूषिता ॥ [३]

मुण्डमालाविभूताङ्गी व्यालयज्ञोपवीतिनी ।

व्याघ्रचर्माम्बरा देवी सिंहचर्मोत्तरीयका ॥ [४][४]

वैरोचनी वज्रपूर्वा वज्रघण्टा वरप्रिया[५] ।

चतुर्भुजा प्रेतसंस्था वर्वरोर्ध्वशिरोरुहा ॥ [५]

कर्तृकपालखट्वाङ्गं डमरुं च धृता करैः[६] ।

सौगतानुगमा साक्षात्[७] कलौ शीघ्रफलप्रदा ॥ [६]

इहैव फलदा नित्या[८] नापवर्गफलप्रदा[९] ।

सौगतानुगमा[१०] सर्वा नानाभेदसमाश्रिता ॥ [७]

---

१ *सौगतामार्गसानुगा– ग, घ ।*

२ *सा– ग, घ ।*

३ *नृत्यमाना– ग, घ ।*

४ *यो पाठ मातृका 'घ'मा छैन ।*

५ *वरा प्रिया– ख, वरप्रदा– ग, घ ।*

६ *करैर्धृता– ग, घ ।*

७ *°°नुचरा सर्वा– घ ।*

८ *सत्या– ग, घ ।*

९ *नाना°– ख ।*

१० *सौगतानुगता– घ ।*

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कालचक्रं शम्बरं[११] च हयग्रीवाख्यभैरवम् ।
योगाम्बरं च कालेशं सावरी सौगताश्रिता ॥ [८]

॥ इति श्रीमहास्रोतसि शिरश्छेदे महाकरवीरयागे परातन्त्रे क्रमे द्वादशसाहस्रिकायां षडाम्नायभेदसूत्रम्[१२] ॥

११ °°शम्बरचक्रं– ग, घ ।
१२ इति श्रीपरातन्त्रे पञ्चसाहस्रिकायां षडाम्नायसूत्रम् ॥ ६ ॥– ग, घ ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सप्तमः पटलः

श्रीदेव्युवाच

देवदेव महादेव सर्वज्ञ परमेश्वर ।

अत्यद्भुतमिदं मन्ये कालीक्रमकुलोद्भवम् ॥ [१]

मानसं कम्पतेऽतीव रोमहर्षश्च जायते ।

कथं सा कालिका देवी शतकोटिप्रभेदतः ॥ [२]

एतद्भेदक्रमं क्वापि न श्रुतं परमेश्वर ।

कालिकाक्रमाश्रित्य[१] स्थितेऽवभासते मनः ॥ [३]

चक्रेश्वरी चक्रभेदं[२] का च सर्वाधिकाश्रिता[३] ।

क्रमभेदकुलोद्भेदं[४] कथं पूजाक्रमं प्रभो[५] ॥ [४]

तस्यार्चनेन देवेश लभेद् वा किं महाफलम् ।

इह[६] चामुत्र किं मुक्तेः[७] साधकः परमेश्वर ॥ [५]

कथं काली ह्यनालम्बा सालम्बा कालघस्मरा ।

निर्गुणा निष्कला नित्या निरंशेति त्वयोदिता ॥ [६]

कोटिभेदं लक्षभेदं वक्तुं यदि न शक्यते ।

मुख्यमार्गानुगा[८] देवीर्नायिकां वद शङ्कर ॥ [७]

यस्यार्चनेन सकलं कालिकापूजनं[९] भवेत् ।

एका एव[१०] परा नित्या या देवी चितिरूपिणी ॥ [८]

---

१ संशोधित पाठ] कालिकाक्रममाश्रित्य । सर्वं कालिक्रमाश्रित्य–क, ख, ग, घ ।

२ चक्रभेदं कालिकायाः– ग ।

३ का च सर्वाधिकारिता– ग, घ ।

४ क्रमभेदे°– ग ।

५ भवेत्– ग, घ ।

६ इदं– ग ।

७ भुक्तेः– घ ।

८ मुखमार्गानुगा– ख ।

९ °°पूजितं– ख ।

१० एकैव सा– ग ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सर्वस्वरूपा सर्वेशी चितिरूपाश्रिता परा।
यस्यामुत्पद्यते विश्वं लीयते स्थीयते पुनः ॥ [९]
वद[११] देव महेशान नमस्ते शशिशेखर।
तासां चक्रेश्वरी नित्या का रूपा कति सङ्ख्यकाः ॥ [१०]
अमृतस्यैव पानेन यथा तृप्यन्ति देवताः।
नायिकाक्रमभेदं च श्रुत्वा तृप्यामि पुष्कलः ॥
वेदोऽप्यजानते[१२] देव सर्वज्ञः सर्वसर्वदा ॥ [११]

श्रीसदाशिव उवाच

ब्रह्माण्डकोटिलक्षाणि भस्मसात् कुरुते च सा।
तां कालग्रासनरतां कालसङ्कर्षिणीं नुमः ॥ [१२]
यस्याः क्रीडार्थमखिलं ब्रह्माण्डं कन्दुकायते।
तां कालग्रासनरतां कालसङ्कर्षिणीं नुमः ॥ [१३][१३]
श्रृणु देवि प्रवक्ष्यामि यत् त्वया मनु पृच्छते।
एका एव[१४] पराशक्तिर्बहुभेदप्रकाशिनी ॥ [१४]
नित्या निरंशा सा[१५] देवी ब्रह्मसत्यप्रकाशिनी।
वक्त्रकोटिसहस्रैस्तु जिह्वाकोटिशतैरपि ॥ [१५]
वर्णितुं नैव शक्नोति शताब्देनापि[१६] सुन्दरि।
पञ्चवक्त्रेण जिह्वाभिः पञ्चभिः परमेश्वरि[१७] ॥ [१६]
लक्षकोटिप्रभेदेषु लेशमात्रं वदामि ते।
कालिकाक्रमभेदेषु या श्रेष्ठा मोक्षदायिनी ॥ [१७]

---

११ देव– ख।
१२ वद खेदो न ते देव– ग।
१३ श्लोक १३को पाठ मातृका 'ग'मा छैन।
१४ एकैव या– ग।
१५ °°निरञ्जना देवी– ख।
१६ शब्देनापि च– ग।
१७ परमेश्वर–क।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तानि ते कथयिष्यामि क्रमपञ्चविनिर्णयम् ।
परं ब्रह्ममयी नित्या साक्षाज्जाग्रत्स्वरूपिणी ।। [१८]
निर्लेपा निर्गुणा नित्या[१८] गुणैः संक्रीडते जगत् ।
न पुमान् न स्त्रियः साक्षान्न षण्ढः प्राकृतो न च ।। [१९]
अव्यक्तरूपा परमा जाग्रद्गुणगुणालया ।
पृथिवीवायुरापोऽग्निः खपञ्चभूतसम्मता ।। [२०]
तस्या रूपमिदं सर्वं सृष्ट्यर्थं सृजते गुणैः ।
धारिणी परमा देवी धरण्यादिशिवान्तया ।। [२१]
पृथुत्वात् पृथिवीत्युक्ता ततः सर्वं महाज्यभूत्[१९] ।
सर्वजीवं प्राणयन्ती सर्वत्र चरणक्षमः ।। [२२]
समः सर्वत्र प्रत्यायुर्गुणैर्वायोः समर्पितः ।
चतुर्विधं जीवनाच्च जगत्स्थावरजङ्गमम् ।। [२३]
जलैः समृद्ध्यते[२०] सर्वं तद् गुणं सा जलेऽर्पितम्[२१] ।
दहत्यग्निर्जगत् सर्वममेध्यं मेध्यमेव वा[२२] ।। [२४]
तेजसा प्रज्वलन्नेव तेजसास्याः समाश्रिता ।[२३]
व्यापकत्वान्महत्वाच्च निरंशत्वाद् गुणाश्रयात् ।। [२५][२४]
आकाशे ह्यर्पिता देव्यः सर्वं सन्धार्यते गुणैः ।
महासौभाग्यजननी महासारस्वतप्रदा ।। [२६]
महासौन्दर्यसुभगा महामृत्युविनाशिनी ।
ब्रह्मविष्णुसुरेन्द्रादिवन्दिता पापहारिणी ।। [२७]
सर्वतीर्थमयी देवी सर्वधर्ममयी शिवा ।

---

१८ सूक्ष्मा– घ ।
१९ सहाह्यभूत्– घ ।
२० संवर्द्धयेत्– ख ।
२१ °°सितम्– घ ।
२२ च– ख ।
२३ तेजसास्याः समाश्रित्य व्यापकत्वाद् गुणाश्रयात्– ग ।
२४ यो पाठ मातृका 'ग'मा छैन ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सर्वक्षेत्रमयी पुण्या सर्वकार्यार्थसाधिनी[२५] ॥ [२८][२६]
महाभोगप्रदा शान्ता महामोक्षफलप्रदा ।
यस्याः प्रभावतो देवि सर्वं शुद्ध्यति नान्यथा ॥ [२९]
वामाचाररता वापि दक्षिणाचारकृद् भवेत् ।
निराचारापि साचारा पापं धर्मो न विद्यते ॥ [३०]
किमाचारविचारेण यदि काल्यर्चने रतः ।
किमाचारविचारेण यदि काल्या न दीक्षितः ॥ [३१]
निराचाराः क्रियाः सर्वाः साचाराः क्रियते यया ।
स्वेच्छात्र भक्षनियमो निराहारसमं स्मृतम् ॥ [३२]
कालीनामाक्षरपदं जपन्[२७] पापानि नश्यते ।
महापातककोटीनां लीलयैव विनश्यते ॥ [३३]
दह्यन्ते सर्वपापानि तूलराशिमिवानलः ।
चक्रोद्धारं प्रवक्ष्यामि श्रृणुष्वैकमना शिवे ॥ [३४]
बिन्दुत्रिकोणपञ्चारं नवकोणं पुनर्लिखेत् ।
अष्टारं चाष्टदलकं दलद्वादशकं तथा ॥ [३५]
षोडशं दलमालिख्य मुण्डप्राकारमालिखेत् ।
चतुःपञ्चाशकं देवी कबन्धं समुदाहृतम् ॥ [३६]
त्रिशूलाग्रे मुण्डमाला चतुःपञ्चाशके प्रिये ।
अष्टदिक्षु श्मशानं तु[२८] विलिखेत् कामदायकम्[२९] ॥ [३७]
ज्वलिताग्नौ दग्धशवं श्रृगालोलूकभैरवम् ।
काकवेतालचैत्यं च लिङ्गं चाष्टश्मशानकम् ॥ [३८]
चिताष्टदिक्षुः प्रलिखेन्महापातकनाशनम् ।
हिरण्ये रजते वापि मणौ वापि च टङ्किते ॥ [३९]

---

२५ *°°साधनी– घ ।*
२६ *यो पाठ मातृका 'ग'मा छैन ।*
२७ *जपात्– ग ।*
२८ *श्मशानाष्टं– ख, घ ।*
२९ *सुखदायकम्– ख ।*

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

चन्दनागरुकर्पूरनाभिकाश्मीरसिन्दूरैः ।
रक्तचन्दनयुक्तेन हेतुना घृष्टयेत् सुधीः ॥ [४०]
भाजने लेपयेत्तेन लिखेद्धेमशलाकया ।
ऋजुरेखा सुलेखेन रम्यदृष्टिमनोहरम् ॥ [४१]
प्रतिमायां पटे वापि स्थण्डिले पुस्तके हृदि ।
खड्गे वापि[३०] त्रिशूले वा महापात्रेऽथवा स्त्रियाम् ॥ [४२]
एते नवसु वै पूज्या नवयोनिपरा प्रिया[३१] ।
दिवायां ब्रह्मचर्ये वै मङ्गलां प्रतिपूजयेत् ॥ [४३][३२]
रात्रौ यथेच्छया पूज्या कालिका कुलशासिनी ।
कूटस्था प्रकृतिः साम्या लीलाभुवनपावनी ॥ [४४]
बृहद्बृहदतिप्रोक्ता रेणोरपि महदणुः ।
अरूपायां तु वक्ष्यामि रूपमव्यक्तरूपिणीम् ॥ [४५]
विना ध्यानेन वै पूजा सकलाप्यकला स्मृता ।
तस्मात् साधकसिद्ध्यर्थं ध्यानयोगं वदामि ते ॥ [४६]
पितामहेन देवेन मां समाराध्य प्रार्थिता ।
तुष्टेन वै अहं[३३] प्रादाद् ब्रह्मणे लोकसर्जके[३४] ॥ [४७]
ब्रह्मणापि पुलस्त्याय दत्तं कालिकुलक्रमम् ।
स च[३५] विश्रवसे प्रादाद्विश्रवा धनदाय च ॥ [४८]
ततो लङ्काधिपाः सर्वे वंशाः कालिक्रमानुगाः ।
दशास्यः कुम्भकर्णश्च विभीषणो महेन्द्रजित् ॥ [४९]
हिरण्यकशिपुर्बाणो बलिर्जालन्धरस्तथा ।
अम्बरीषोऽथ मान्धाता नहुषो हैहयादयः ॥ [५०]

---

३० *नाथ– ख, ग, घ ।*
३१ *प्रिये– ग ।*
३२ *दिवा च ब्रह्मचर्यं वै मंगलायाः प्रपूजने– ग ।*
३३ *अहं] संशोधित पाठ । मया– क, ख, ग, घ ।*
३४ *°°सर्जने– ख, घ ।*
३५ *स च] संशोधित पाठ । तेन– क, ख, ग, घ ।*

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नारदाद्या मुनिगणा दुर्वासा गाधिनन्दनः ।
विरूपाक्षादयः सिद्धा रेमिरे स्वेच्छया मुदा ॥ [५१]
तस्याः प्रसादलेशेन[३६] त्रैलोक्यविजयी भवेत् ।
ब्रह्मणा प्रेरितः पश्चाल्लङ्केश्वरवधाय च ॥ [५२]
विश्वामित्रवसिष्ठाभ्यां राघवाय प्रदत्तवान् ।
सरयूतीरतीर्थे वै दशोनत्रिशताक्षरी ॥ [५३]
त्रिशताक्षरी मन्त्रो वै त्रैलोक्यैश्वर्यदायकः[३७] ।
दशवर्णमयी देवी[३८] गोपिता यत्नतः पुरा ॥ [५४]
यदि पूर्णो भवेद् देवि मन्त्रो वै त्रिशताक्षरी ।
यो जानाति स पुण्यात्मा भैरवोऽयं न संशयः ॥ [५५]
मन्त्रमातेति विख्याता त्रैलोक्यैश्वर्यदायिनी ।
समस्तमन्त्रजननी सर्वमन्त्रप्रबृंहिणी ॥ [५६]
बहुधा वर्णिता मन्त्रा माता सर्वप्रदायिनी ।
प्रत्यङ्गिरा महाकाली मोक्षसौख्यप्रदायिनी ॥ [५७]
नानया सदृशी विद्या विद्यते भुवनोदरे ।
राज्यदा धनदा मोक्षदात्री कैवल्यदायिनी ॥ [५८]
तेनास्त्रेण च रामेण रावणो विनिपातितः ।
तदा प्रभृतिः तां देवीं सूर्यवंशा नृपेश्वराः ॥ [५९]
इष्टत्वेन च सम्पूज्य सर्वे तस्यानुगाश्रिताः ।
आद्या कालीक्रमं पञ्च एका सा पञ्चधा गता ॥ [६०]
कालीकुलसमुद्भूता पुलस्त्येनावतारिता ।
कुमारी त्रिमुखी काली नव एकाक्षरा स्थिता ॥ [६१]
आद्या या सृष्टिकाली च द्वितीया स्थितिकालिका ।
संहारकालिका उग्रा तृतीया दिव्यरूपिणी[३९] ॥ [६२]

---

३६ *°°मात्रेण– ग ।*
३७ *°°दायकः] संशोधित पाठ । °° दायिनी– क, ख, ग, घ ।*
३८ *दशवर्णा महादेवी– घ ।*
३९ *उग्र°°– ग ।*

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अनाख्या कालिका देवी चतुर्थी परमाश्रिता ।
भासाकाली पञ्चमी तु अद्वैतभावमाश्रिता ॥ [६३]
अभिन्नरूपास्ताः सर्वा गुह्यकालीतनौ श्रिता ।
शरीरावयवा वक्त्रा बाह्वादीना सनाडिका ॥ [६४]
पञ्चकाली महोग्रासा एका सा भिन्नरूपिणी ।
आत्मा वेश्वरभूता या गुह्यकाली प्रकीर्तिता ॥ [६५]
तासां ध्यानं प्रवक्ष्यामि श्रृणु पापभयापहम् ।
अथ वक्ष्ये महादेव्या ध्यानयोगमनुत्तमम् ॥ [६६]
येन[४०] विज्ञातमात्रेण साधकः सिद्धिभाग् भवेत् ।
नीलोत्पलदलश्यामा नीलरत्नविनिर्मिता[४१] ॥ [६७]
ज्ञानरश्मिच्छटाटोपा ज्योतिर्मण्डलसम्भवा ।
दशवक्त्रा महाकाली सप्तविंशतिलोचना ॥ [६८]
अष्टोत्तरशतार्द्धं च भुजदण्डैर्नराननना ।
दीपकमूर्ध्वकं वक्त्रं चण्डयोगेश्वरी मतम् ॥ [६९]
ज्योतिर्मयमहावक्त्रं निर्वाणपददायकम्[४२] ।
तदधः सिंहवदनं श्वेतवर्णं सुभास्वरम् ॥ [७०]
फेरुवक्त्रं च तदधः कृष्णं त्रैलोक्यडामरम् ।
कपीन्द्रस्य मुखं वामे रक्तवर्णं महोल्बणम् ॥ [७१]
कोलवक्त्रं भवेद् दक्षं धूम्रवर्णं भयानकम् ।
तार्क्ष्यवक्त्रं च वामे स्यात्[४३] पिङ्गवर्णं सचञ्चुकम्[४४] ॥ [७२]
दक्षिणे मकरास्यं च हरिताभं प्रकीर्तितम् ।
गजास्यं वामके प्रोक्तं गौरवर्णं महोल्बणम् ॥ [७३]

---

४० *योग– घ ।*
४१ *°°विभूषिता– ग, घ ।*
४२ *°°पददायी तत्– ग ।*
४३ *वामञ्च–ख, ग ।*
४४ *सचुचुकम्– ग ।*

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

हयास्यं दक्षिणे काल्याः श्यामवर्णं विचिन्तयेत् ।
सर्वदंष्ट्रा कराला च त्रिनेत्रा भीमनादिनी ॥ [७४]
भ्रूभङ्गकुटिला भीमा कालास्या श्रीमुखोत्तमा ।
पिङ्गलोर्ध्वजटाटोपचन्द्रार्द्धकृतशेखरा ॥ [७५]
नानारत्नैश्च घटिता श्वेतकाद्यालिमालिनी ।
सप्तविंशतिमुण्डाश्च[४५] रक्तविप्रुषसंयुताः[४६] ॥ [७६]
वज्रालिपुष्पसंयुक्ता शिरोमाला प्रकीर्तिता ।
चिद्रत्नवटिका काद्यं खड्गपाशं च शक्तिकम् ॥ [७७]
खट्वाङ्गमुण्डधनुषं चक्रघण्टा च सुस्वना ।
बालप्रेतं च शैलं च कङ्कालं नकुलं तथा ॥ [७८]
सर्पं च कुट्टनीवंशं षडस्रं डोडिका पुनः ।
वह्निपात्रं च दण्डं च स्रुवमष्टारकेशरी ॥ [७९]
वक्त्रमुद्गरडमरुं बिभ्रती वामबाहुभिः ।
चिद्रत्नवटिकाकर्तृतर्जन्यङ्कुशदण्डकम् ॥ [८०]
रत्नपूर्णं च कलशं त्रिशूलं दुष्टनाशनम् ।
पञ्चपाशुपतं बाणं पद्मद्वीपमतोद्गमम् ॥ [८१]
कुन्तं च पारिजातं च छुरिका[४७] तोमरं तथा ।
पुष्पमाला डिण्डिमं च गृध्रं स्वस्तिकवर्द्धिनीं ॥ [८२]
कमण्डलुं श्रुवं चैव पशुपुष्टिभयापहम् ।
नद्यावर्तं कुण्डलं च मांसखण्डसुशोभनम् ॥ [८३]
बीजपूरफलं शूची बिभ्रती दक्षबाहुभिः ।
व्याघ्रचर्मपरीधाना कालचर्मोत्तरीयका ॥ [८४]
किङ्किणीजालशोभाढ्या वीरघण्टानिनादिनी ।
नूपुरारावनिर्घोषा घर्घरारावभीषणा ॥ [८५]

---

४५ *°°मुण्डैश्च– ग ।*
४६ *°°संयुता– ग ।*
४७ *छुरिका–क,ख ।*

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कनकाङ्गदकेयूरा महास्थिकृतशोभना ।
मुण्डमाला गले देव्या आपादान्तविलम्बिनी ॥ [८६]
रक्तपद्ममयी माला शुष्ककाद्यालिकास्तथा ।
काञ्चीकट्टारकोपेता कटिदेव्या विराजिता ॥ [८७]
ब्रह्मसूत्रोज्ज्वलत्कण्ठा योगपट्टोत्तरीयका ।
सौम्योग्रभूषणैर्युक्ता नागराजाद्यलङ्कृता ॥ [८८]
रक्तकुण्डलकर्णश्री पञ्चकालासनस्थिता ।
शिवासनं तदूर्ध्वं च नीलं नादोर्ध्वलाञ्छनम् ॥ [८९]
महार्घरत्नमांसं[४८] च कृष्णवर्णं चतुर्भुजम् ।
एकवक्त्रं त्रिनयनं भैरवाभरणान्वितम् ॥ [९०]
कर्त्रीकपालहस्तं च डमरुखट्वाङ्गधारिणम् ।
एवं भैरवपीठं तु[४९] देव्या आसनमुत्तमम् ॥ [९१]
पञ्चप्रेतं च तदधो ब्रह्माद्याः पञ्चकारणाः ।
ब्रह्मा विष्णुश्च रुद्रश्च ईश्वरश्च सदाशिवः ॥ [९२]
पीतश्यामरक्तधूम्रश्वेताभाः पञ्चकारणाः ।
दण्डचक्रशक्तिशूलखट्वाङ्गायुधधारकाः ॥ [९३]
तर्जनीमुखनिःक्षिप्ताः शिवाधस्था त्रिलोचना ।
पिङ्गरक्तत्रिगुणा हि[५०] फेत्काररवभीषणा ॥ [९४]
वज्रदंष्ट्रा[५१] नखस्पर्शा पद्मपृष्ठे शिवोत्तमा ।
शचीपत्यादिरत्नं च दिग्वर्णं च सवर्णकम् ॥ [९५]
इन्द्रः पीताभवज्रश्च वह्निरक्तः सशक्तिकः ।
यमः कृष्णश्च दण्डाढ्यो धूम्रो निर्ऋतिखड्गकः ॥ [९६]
वरुणः पाशशुभ्रास्यं वायुः स्यान्मकरे ध्वजे ।
कुबेरः कुङ्कुमगदः शुक्लमीशानशूलकम् ॥ [९७]

---

४८ *°°मालां च– घ ।*
४९ *च– ग, घ ।*
५० *°°त्रिगुणः स्यात्– ग, घ ।*
५१ *वक्रदंष्ट्रा– घ ।*

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

दिगष्टपतयो ज्ञेया आसनं परिकीर्तितम् ।
शुक्लं कृतयुगं ज्ञेय[५२] पीतं त्रेतायुगं स्मृतम् ॥ [९८]
द्वापरं चारुणं वर्णं श्यामं चैव कलिः स्मृतम् ।
ऋग्वेदः शुक्लवर्णश्च यजुः पीतं सुवर्णवत् ॥ [९९]
सामं रक्तमिति ख्यातं कृष्णाथर्वणमुच्यते ।
उपवेदास्तथा वर्णा एवमासनमुच्यते[५३] ॥ [१००]
सहस्रसूर्यज्वालाग्रमासनं परिकीर्तितम् ।
पद्मोपरिस्थितां देवीं नृत्यमानां सदोदिताम् ॥ [१०१]
अथवा सुखमासीनां सर्वदेवाभिवन्दिताम्[५४] ।
सहस्रसूर्यप्रतिभां दुर्निरीक्षां दुरासदाम् ॥ [१०२]
सर्वदेवाश्रयां नित्यां मालिनीं जयमङ्गलाम् ।
मुक्तहूङ्कारजिह्वाग्रं लालयन्तीं विचिन्तयेत् ॥ [१०३]
प्रत्यालीढपदां वापि नृत्यमानापि वा स्मरेत् ।
सर्वमन्त्रमयी धीरा सर्वलक्ष्मीर्जयेश्वरी ॥ [१०४]
एवं ध्येया महाकाली प्रोद्भिन्ननवयौवना ।
भासाक्रमस्य[५५] मध्यस्था चक्रेशी परमेश्वरी[५६] ॥ [१०५]
पञ्चकालीप्रभेदस्तु विशेषं श्रृणु पार्वति ।
नववक्त्रा महाकाली सप्तविंशतिलोचना ॥ [१०६]
ऊर्ध्वं ज्योतिर्मयं वक्त्रं चण्डयोगेश्वरीभिधम् ।
चिद्रत्नवटिकामुद्रा[५७] मूलदेव्यास्तु एव सा ॥ [१०७]

---

५२ *प्रोक्तं–ख ।*
५३ *एवमासनमुत्तमम्– ख, घ ।*
५४ *°°भिवन्दिताम्– ख ।*
५५ *°°चक्रस्य–ग, घ ।*
५६ *चक्रेशभुवनेश्वरी– ग, घ ।*
५७ *चिद्रत्नघटिकामुद्रा– ग ।*

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वक्त्रैकरत्नमुद्रा[५८] च विहीना पञ्चकालिका ।
वक्त्रं शस्त्रं भुजं माला आसनानि क्रमेण[५९] च ॥ [१०८]
भूषणादीनि वर्णानि यथा श्रीगुह्यकालिका ।
सृष्टिस्थिती च[६०] संहार अनाख्या या महेश्वरी ॥ [१०९]
भासाकाल्यास्तु रूपाणि विशेषं सर्वतः श्रृणु ।
विशेषिका विशेषेण तद्वक्ष्यामि क्रमेण तु ॥ [११०]
नीलजीमूतसङ्काशा नववक्त्रा महेश्वरी ।
पूर्वोक्तध्यानराजैस्तु तुल्या चान्या महेश्वरि ॥ [१११]
बद्धपद्मासनां देवीं पीनोन्नतपयोधराम् ।
जिह्वाग्रेण वामदंष्ट्रां स्पर्शयन्तीं त्रिभङ्गिकाम् ॥ [११२]
मदघूर्णितदीर्घाक्षीं ध्यानलोचनतत्पराम् ।
चिद्रत्नवर्तिकां ह्याज्यां वरदाभयपाणिनीम् ॥ [११३]
तर्जन्यग्रे स्थितं वज्रं[६१] मूर्तिर्ज्वलनसप्रभाम् ।
रश्मिद्वादशसंयुक्तामनाख्येशीं स्मरेत् सदा[६२] ॥ [११४]
संहारचक्रमध्यस्थां निर्मांसां कोटराम्बिकाम् ।
प्रत्यालीढपदां देवीं दन्तोष्ठघृष्टपिण्डिकाम्[६३] ॥ [११५]
लेलिहानां ललज्जिह्वां मुक्तहूँकाररराविणीम् ।
वरदानं परित्यज्य विभ्राणामजकेशवौ ॥ [११६]
दशशक्तिसमायुक्तां विश्वसंहारकारिणीम् ।
स्थितिक्रमस्य मध्यस्थामीषत् प्रहसिताननाम् ॥ [११७]
खर्वां लम्बोदरीं देवीं राजलीलासनस्थिताम् ।
अजकृष्णौ परित्यज्य ब्रह्मकङ्कालवल्लकीम् ॥ [११८]

---

५८ *वक्त्रैक°– ग, घ ।*
५९ *क्रमाणि– ख, घ ।*
६० *सृष्टिः स्थितिश्च– ग, घ ।*
६१ *वस्त्रं– ग, वक्त्रं– घ ।*
६२ *स्मरेन्मुदा– ग, घ ।*
६३ *रक्तौष्ठ°– घ ।*

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वादयन्तीं महाकालीं स्थितिस्थां षोडशात्मिकाम् ।
सृष्टिक्रमस्य मध्यस्थामट्टहाससमन्विताम् ॥ [११९]
ऊर्ध्वां समयदां चारु ललितातनुविग्रहाम् ।
विहाय ब्रह्मविष्णुं च विभ्रतीं चन्द्रभास्करौ ॥ [१२०]
योनिपञ्चकमध्यस्थां ध्यायेत् सृष्ट्यैकहेतवे ।
अनाख्यचक्रमध्यस्था भासादेवी जगन्मयी ॥ [१२१]
सर्वा कालीसृता देवी षोडशारे प्रतिष्ठिता ।
चन्द्रसूर्यौ परित्यज्य मञ्जीरद्वयधारिणी ॥ [१२२]
जगद् भासयते भासाकाली विष्णुसमुद्भवा ।
बाला कुमारी या काली सर्वसंसृतिरूपिणी ॥ [१२३]
त्रिमुखाष्टभुजा देवी कपालमालसंयुता ।
पिबन्ती रुधिरं दिव्यं कृष्णवर्णा त्रिलोचना ॥ [१२४]
पाशाङ्कुशं वज्रशूलं खट्वाङ्गं मुद्गरं तथा ।
मृतबालमुण्डहस्तं कपालं रक्तपूरितम् ॥ [१२५]
एवं ध्यात्वा महादेवी नानाभोगफलप्रदा ।
एतदेव हि भेदोऽयं पञ्चकालस्य कारणम् ॥ [१२६]
ततः समस्तरूपाणि कालिकाक्रम उद्भवा ।
विधिवत् पूजयेन्नित्यं विधिलोपं न कारयेत् ॥ [१२७]
यथा गुरूपदिष्टं तु तदेव व्रतमाचरेत् ।
देवतामन्त्ररूपाणि गुरुरेव न संशयः ॥ [१२८]
शिवे रुष्टे गुरुस्त्राता गुरौ रुष्टे न कश्चन ।
गुरुरेव सदा पूजा कालिकातुष्टिहेतवे ॥ [१२९]
अन्धे तमसि सम्मग्ने गुरुरेव परा गतिः ।
बन्धुपुत्रसहस्रेषु मातुः पितुः शतेष्वपि ॥ [१३०]
एतेभ्यो गौरवत्वाच्च गुरुरित्यभिधीयते ।
ब्रह्महत्यादिपापानां निष्कृतिः समुदाहृता ॥ [१३१]

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

गुरुद्रोहकृतानां तु निष्कृतिर्नास्ति पार्वति ।
गुरोश्च देवतायाश्च द्वैतभावं न कारयेत् ॥ [१३२]
स्वात्मा विक्रीयतो वापि गुरुमेव प्रपूजयेत् ।[६४]
गुरौ तुष्टे जगत् तुष्टमित्याज्ञा पारमेश्वरी ॥ [१३३]
अकृत्वा नरकं याति षष्टिवर्षशतानि च ।
अशरीरा वर्णरूपा ब्रह्माण्डव्यापिनी शिवे ॥ [१३४]
पिण्डदानादिसंस्कारं यथा पितुस्तथा गुरोः ।
न माता न पिता पुत्रा भ्राता बन्धुः सुहृन्नृपः ॥ [१३५]
गुरोर्गुरुतरं देवि न कुर्यात् त्रिभिः सर्वथा ।
यस्य प्रसादाज्जानीयात् त्रैलोक्यं सचराचरम् ॥ [१३६]
न तोषितो गुरुर्येन तस्य स्यान्निष्फला क्रिया ।
यस्य वक्त्राद् विनिर्याता देवी शब्दमयी परा ॥ [१३७]
न गुरुं वञ्चयेच्छिष्यः प्राणैः कण्ठगतैरपि ।
देवता मन्त्रसकलं लङ्घितं तेन भैरवि ॥ [१३८]
गुरुदैवतमन्त्राणि मनागू भेदं न कारयेत् ।
भेदेन निरयं याति समूलं विनिहन्ति वै[६५] ॥ [१३९]
गुरुं सन्तोषयेद् यत्नैः स्वप्राणेनापि श्रद्धया ।
द्वीपकस्यैव वेताला परां गतिमवाप्नुयात् ॥ [१४०]
गुरुः सन्तोषितो येन रक्षितं भुवनत्रयम् ।
नातः परतरं किञ्चिद् गुरोरप्यधिकं प्रिये ॥ [१४१]
अशरीरा वर्णरूपा ब्रह्माण्डव्यापिनी शिवे ।
पिण्डदानादिसंस्कारं यथा पितुस्तथा गुरोः ॥ [१४२]
अकृत्वा नरकं याति षष्टिवर्षशताधिकम् ।
शरीरदः पिता देवि ज्ञानदो गुरुरेव च ॥ [१४३]
गुरोर्गुरुतरं नास्ति संसारे दुःखसागरे ।
यस्य वक्त्राद् विनिर्यातं वर्णब्रह्ममयं वपुः ॥ [१४४]

६४ १३३।३–४ देखि १३४।३–४सम्मको पाठ मातृका 'घ'मा १४२।१–२ पछि रहेको छ ।
६५ च– घ ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तारयेन्नात्र सन्देहो नरकार्णवतो ध्रुवम् ।
अतोऽहं[६६] सम्प्रवक्ष्यामि सारं सर्वार्थकामदम्[६७] ॥ [१४५]
एकाक्षरी नवाक्षरी षोडशाक्षरी वारुणी ।
चतुःपञ्चाशवर्णा च शताक्षरी विशेषतः ॥ [१४६][६८]
द्विशताक्षरी मन्त्रश्च दशोनत्रिशताक्षरी ।[६९]
सहस्राक्षरी देवेशि प्राणभूतास्तु कालिका ॥ [१४७]
अम्बरं पवनं वह्निरापश्च धरणी तथा ।
रावणी[७०] नाम सा विद्या मोक्षदा भुक्तिदापि च[७१] ॥ [१४८]
एकाक्षरी पराविद्या भोगमोक्षप्रदा स्मृता[७२] ।
शिवशक्तिसमायोगो भवेदत्र[७३] च पार्वति ॥ [१४९]
महाकुण्डलिनी देवी[७४] महारावेति[७५] पूजिता ।
वह्निं शिवाक्षराणां[७६] च कालं तथा च वारुणम्[७७] ॥ [१५०]
शिखी च मधुहायुक्ता काली प्राणमुदाहृतम् ।
ख्फ्रेंमात्मकमालिख्य महाचण्ड तथा लिखेत् ॥ [१५१]
योगेश्वरीपदं दत्त्वा विद्येयं सा नवाक्षरी ।
षोडशाक्षरी या विद्या प्राणभूताश्च ताः श्रृणु[७८] ॥ [१५२]

---

६६ *अथाहं– ग, घ ।*
६७ *°°साधनम्– ग, °°साधकम्– घ ।*
६८ *यो पाठ मातृका 'ग'मा छैन ।*
६९ *यो पाठ मातृका 'ग'मा छैन ।*
७० *वारुणी– ग ।*
७१ *भुक्तिदा प्रिये– घ ।*
७२ *भोगमोक्षफलप्रदा– ग, घ ।*
७३ *भवेद्यत्र– घ ।*
७४ *नित्या– घ ।*
७५ *देवदेवेति– घ ।*
७६ *°°क्षरान्तं च– ग ।*
७७ *कालं च वारुणं तथा– ग, घ ।*
७८ *प्राणभूतास्तु कालिका– घ ।*

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

यस्योपदेशमात्रेण ब्रह्मभूयाय कल्पते ।

त्रिपदं[७९] तु समुद्धृत्य महारावं ततो लिखेत् ॥ [१५३]

निशामाधवसंयुक्तं ज्ञेयं त्रिदशवन्दिते ।

सत्यारूढः शाश्वतश्च तुष्टिना कवलीकृतः ॥ [१५४]

सत्यमत्या समारूढा सूक्ष्मेण कवलीकृता ।

ततश्चक्री जाठरं च नारायणसमन्वितम् ॥ [१५५]

माधवेन समायुक्तं बालाबीजं पुनर्लिखेत् ।

माया चण्डी कूर्चलक्ष्मीर्महारावं पुनर्लिखेत् ॥ [१५६]

नतिं[८०] नियोजयेद् देवि शिरोमन्त्रं समुच्चरेत् ।

वर्णषोडशमाख्यातं मन्त्रराजमुदाहृतम् ॥ [१५७]

पञ्चपिण्डाग्रतो दत्त्वा महासप्तदशी भवेत् ।

अनादि यन्महामन्त्रं वर्णराजमुदाहृतम् ॥ [१५८]

शताक्षरं मन्त्रराजं तथा पञ्चशताक्षरम् ।

पञ्चाक्षरमादिमन्त्रं तथाष्टाक्षरमन्त्रकम्[८१] ॥ [१५९]

दशोनत्रिशता विद्या महामन्त्रमुदाहृतम् ।

द्विशतं[८२] तु महादेवी नवत्यधिक सुव्रते ॥ [१६०]

वसिष्ठहेतोर्हि पुरा सहस्राक्षरमालिका ।

एतत्परतरं देवि कुलाचारक्रमो विधिः ॥ [१६१]

परं ब्रह्मस्वरूपं तु नादबिन्दुकलात्मिका ।

सकलार्णवमध्यस्था[८३] सकलार्णवरूपिणी ॥ [१६२]

श्रीगुरोः कृपया देवी सम्प्रदायक्रमागतम् ।

लभ्यते यदि भाग्येन कोऽन्यो धन्यतरो भुवि ॥ [१६३]

---

७९ *ऐँपदं– ग, घ ।*

८० *नेतिं– घ ।*

८१ *तथा त्र्यक्षरपञ्चकम्– ग, घ ।*

८२ *त्रिशतं– घ ।*

८३ *संसारार्णव°– ग ।*

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मनुष्यवपुराच्छन्नः स शिवो[८४] नात्र संशयः ।
वर्णितुं नैव शक्नोमि कालिकायाः कुलक्रमम् ॥ [१६४]
वर्णषोडशका विद्या राज्यदा प्राणदा स्मृता ।
महासौख्यप्रदा शान्ता सा काली प्राणदायिनी ॥ [१६५]
वैखरी चान्यभावत्वादशक्ता[८५] गुणवर्णने ।
ब्रह्मविद्यास्वरूपा सा भुक्तिमुक्तिफलप्रदा ॥ [१६६]
एकोच्चारेण देवेशि वाजपेयस्य कोटयः ।
अश्वमेधसहस्राणि प्रादक्षिण्यं भुवस्तथा ॥ [१६७]
प्रयागे स्नानजं[८६] पुण्यं मकरस्थे दिवाकरे ।
तस्य शतगुणं प्रोक्तं[८७] कालिकाविधिमाचरन् ॥ [१६८]
[८८]चातुराश्रम्ययत्पुण्यं क्रमेण परिसेवितम् ।
यत्पुण्यं वर्णधर्मस्य तत्पुण्यं कालिकार्चनात् ॥ [१६९]
काश्यादितीर्थयात्रां च सार्द्धकोटित्रयान्वितम् ।
तुलनां[८९] याति देवेशि सत्यं सत्यं न संशयः ॥ [१७०]
लक्षजापेन देवेशि किं पुनः सिद्धिभाग् भवेत् ।
यस्याः सामर्थ्यतो देव्या[९०] भुवनानि चतुर्दश ॥ [१७१]
अभवन् परमेशानि तेषां कारणरूपिणी ।
पुरश्चर्या कृता येन तेषां विद्या फलोद्गमा[९१] ॥ [१७२]
अकृत्वा तु पुरश्चर्यां न मन्त्रः फलदो भवेत् ।
ब्रह्माण्डकोटिजननी महामोक्षप्रदायिनी ॥ [१७३]

---

८४ शिवोऽसौ– ग, घ।
८५ वाच्य°– ग, घ।
८६ प्रयागस्नानजं– ग।
८७ तस्माच्छतगुणं पुण्यं– ग।
८८ चतुराश्रमस्य°– ग, घ।
८९ तुलां न– ग, घ।
९० देवि– ग।
९१ फलोद्भवा– ग, घ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

निःसरन्ति महामन्त्रा विस्फुलिङ्गा यथा प्रिये ।
अग्नेः सकाशाद् बहवो भेदविद्याः प्रकाशिताः ॥ [१७४]
प्रणवात् सर्वमुत्पन्नाः[९२] परं ब्रह्ममयी तु सा ।
पाता हर्ता रक्षिता च नान्या तु भुवनेश्वरी ॥ [१७५]
नानाम्नायस्वरूपेण नानारूपेण मायया ।
मोहयन्ती जगत्सर्वं पुत्रपौत्रप्रवर्द्धिनी ॥ [१७६]
स्त्रीपुंभावेन सततं ग्रथितं कामसूत्रके[९३] ।
सर्वत्र व्यापिनी चापि ब्रह्मस्थाननिवासिनी ॥ [१७७]
सौभाग्यबन्धग्रहणा[९४] विश्वयोनिरितीरिता ।
चतुर्वाङ्मयनिष्ठेयं त्रैलोक्यवशकारिणी ॥ [१७८]
सूक्ष्मा संविन्मयी देवी रूपिणी भाग्यदायिनी[९५] ।
महासम्पत्प्रदा नित्या साक्षादक्षररूपिणी ॥ [१७९]
षोडशाक्षररूपेण विश्वं व्याप्य व्यवस्थिता ।
नवाक्षरी महाविद्या पञ्च चाष्टाक्षरी तथा ॥ [१८०]
एकाक्षरी दशार्णा च शतार्णा[९६] च सहस्रकम् ।
एतेषु मन्त्रवर्गेषु विश्वं व्याप्य व्यवस्थिता ॥ [१८१]
चतुर्वेदेषु यत्सारं तदङ्गेषु च यत् स्मृतम् ।
पुराणस्मृतिसारेषु यत्तु सारतमं महत् ॥ [१८२]
तत्सर्वेभ्योऽधिकं सारं सारात् सारतरं परम्[९७] ।
नवनीतं यथा दध्ना सारोद्धृतं[९८] घृतं भवेत् ॥ [१८३]

---

९२ *प्रणवात् तु समुत्पन्ना– ग ।*
९३ *कर्मसूत्रके –ग, घ ।*
९४ *सौभाग्यबन्धवहना– ग, सौभाग्यगन्धगहना– घ ।*
९५ *भोग्यदायिनी– ग, घ ।*
९६ *मातृका 'क'मा शतार्णा शब्द लेख्न छुटेको छ ।*
९७ *महत्– घ ।*
९८ *सारोद्धृत्य– घ ।*

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तदेवममृतं नाम देवानां प्राणधारणम् ।
तथा समस्तशास्त्रेषु वेदे तन्त्रेषु चाज्ञया ॥ [१८४]
उद्धृत्य सर्वसारेभ्यो ब्रह्मणा प्रतिपादिता ।
ब्रह्मणापि वसिष्ठाय वसिष्ठो राघवाय च ॥ [१८५]
दत्तं सर्वात्मना तेन ततो मर्त्येऽवतारिता ।
अद्वैतो द्विविधा कृत्वा मुनिना ज्ञानदृष्टिना ॥ [१८६]
दशोनत्रिशताक्षर्या मन्त्रवीर्याः प्रकाशिताः ।
सौम्यसिद्धिः कृतानेन[९९] देवी प्रत्यङ्गिराभिधा ॥ [१८७]
नारदानुमतेनैव संज्ञा देव्या द्विधा कृता ।
निधानमिव चौरेभ्यो रक्षणीया प्रयत्नतः ॥ [१८८]
न देया यस्य कस्यापि देया प्राणप्रदायिने ।
निर्मलाय प्रशान्ताय प्राणेभ्योऽपि प्रियाय च ॥
ज्ञाननिष्ठाय दातव्यं सारमेतन्महेश्वरि ॥ [१८९]

॥ इति श्रीमहास्रोतसि शिरश्छेदे करवीरयागे परातन्त्रे क्रमे द्वादशसाहस्रिकायां कालीक्रमनिर्णयसूत्रम् ॥

९९ *कृता तेन– ग।*

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अष्टमः पटलः

श्रीदेव्युवाच

नमो देवाधिदेवाय[१] सर्वज्ञाय महात्मने[२] ।
सृष्टिस्थित्यन्तकर्त्रे च सर्वव्यापि नमोऽस्तु ते ॥ [१]
जय देव जगन्नाथ किञ्चित् प्रष्टुं मम प्रभो ।
मनो मे तरलं जातं भयाद् वक्तुं न चोत्सहे ॥
प्रसीद परमेशान संशयं छेत्तुमर्हसि ॥ [२]

श्रीसदाशिव उवाच

मा शङ्कां कुरु देवेशि त्वदन्यो[३] नास्ति मत्प्रियः[४] ।
निःशङ्कं स्वेच्छया देवि पृच्छ यद्धृदि वाञ्छितम् ॥
यं यं त्वत्संशयं देवि तं तं पृच्छ यथेच्छया ॥ [३]

श्रीदेव्युवाच

नमस्तुभ्यं नमस्तुभ्यं नमस्तुभ्यं महेश्वर ।
चिद्रूपिणी परादेवी कालिकात्वं गता यदा ॥ [४]
कस्माद् द्वैधं गता देव नारदानुमतेन च[५] ।
सर्वागमविदः शूरः साधकानां वरो मुनिः ॥
किं भेदं वै चकाराथ[६] वसिष्ठनारदौ पुरा ॥ [५]

---

१ *देवाय शान्ताय– घ।*
२ *कृतात्मने–ख।*
३ *त्वदन्या– ग, घ।*
४ *मे प्रिया– ग, घ।*
५ *वै– ग, घ।*
६ *चैव को नाथः– ग।*

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

श्रीसदाशिव उवाच

धन्यासि कृतकृत्यासि श्रोतुं जानासि तत्त्वतः ।
एतत् सूक्ष्मातिभेदेन पुनः श्रोतुं मतिस्तव ॥ [६]
जाता परात्मिका बुद्धिर्नमस्ते परमेश्वरि ।
सप्तदशाक्षरी विद्या या विद्या परमा कला ॥ [७]
खण्डस्य खण्डिनी खण्डा खण्डखण्डाण्डखण्डिनी ।
खण्डचक्रगता काली विद्या सप्तदशाक्षरा[७] ॥ [८]
फणीरूपस्य कालस्य अकुला बिन्दुभक्षिणी ।
त्रिधा चानुहता लक्ष्मीर्विद्या सप्तदशी स्मृता ॥ [९]
अकला कुलमध्यस्था[८] कलास्था अकुला कुला ।
अकला परमानन्दा सिद्धिः सप्तदशाक्षरी ॥ [१०]
रावस्थं रावमध्यस्थं रावरावनियोजिता[९] ।
रावलीला वरा ज्ञेया महासप्तदशाक्षरी ॥ [११]
कान्तगादिच्छान्तजातं महाकल्लोलहूङ्कृतम् ।
रावलीलाकलाक्रान्तमेताः[१०] सप्तदशी कला ॥ [१२]
अक्षराक्षरयोगेन कालीशब्देन यत्स्थिता ।
योगेश्वरीपदं नास्ति विद्या सप्तदशाक्षरी ॥ [१३]
हहहाहहहेलीना विलीना हहहेहसा ।
हानादानपदे लीना विद्या सप्तदशाक्षरी ॥ [१४]
एवं सप्तदशं वर्णं वर्णयेत् परमेश्वरी ।
क्रमसर्वोत्तरं तीव्रं निर्गुणं परमेश्वरी ॥ [१५]
शतद्वयं तु वर्णानां नवत्यधिककीर्तितम् ।
त्रिगुणै रहिता विद्या त्रिखण्डा परिकीर्तिता ॥ [१६]
नवषोडशवर्णानां भेदो नात्रैव विद्यते ।

---

७ *सप्तदशाक्षरी– घ ।*
८ *अकलाकल°–ख ।*
९ *रावे रावं नियोजिता– ग, रावं रावनियोजिता– घ ।*
१० *रावलीलचलाक्रान्त°, घ ।*

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अनया विद्यया देवी जन्ममृत्यू विहाय च ॥ [१७]
नारदाद्या मुनिश्रेष्ठा योगिनः कपिलादयः ।
त्रिलोकविजयी भूत्वा स्वेच्छया विचरन्ति[११] वै ॥ [१८]
अव्याहतगतिः प्राप्ता त्रिकालज्ञो भवेत् तदा ।
शोणिताख्ये पुरे[१२] देवि हरिशङ्करविग्रहे[१३] ॥ [१९]
नारदेन मुनीन्द्रेण कृष्णाय सम्प्रदत्तवान् ।
हरिणा जृम्भणास्त्रेषु प्रयुज्य[१४] हरमोहितः ॥ [२०]
वासुदेवोऽपि पार्थाय रक्षार्थं प्रददौ पुरा ।
भृङ्गोपभुक्तपुष्पं तु शिवयोग्यं यथा भवेत् ॥ [२१]
तद्वन्निरक्षरं वस्तुरक्षरैरपि संयुतः ।
नोद्धारं लेखयेद् देवि साक्षाद् वर्णेश्वरी परा ॥ [२२]
शापो भवति वै नूनं मन्त्रहानिः प्रजायते ।
विमुखी भवती काली पापानामाश्रयो भवेत् ॥ [२३]
कर्णे कर्णे तु देवेशि हृदिस्थं कुरु सर्वदा ।
गुरुवक्त्राद् विनिष्क्रान्ता श्रोत्रमार्गाद्धृदि स्थिता ॥ [२४]
उदके लिखितं यद्वन्मन्त्रोद्धारं तथा भवेत् ।
भोगमोक्षप्रदां विद्यां पुस्तके नैव लेखयेत् ॥ [२५]
संवत्सरकृतावासं ज्ञात्वा कर्म शुभाशुभम् ।
ततो मन्त्रोपदेष्टव्यो यद्यात्मशुभमिच्छति ॥ [२६]
अपरीक्षितशिष्याय यस्तु मन्त्रं प्रयच्छति ।
निरये नियतं वासो भविष्यति सुदारुणे ॥ [२७]
तस्मात् सर्वप्रयत्नेन न प्रकाश्यं कदाचन ।
आस्तिक्यबुद्धिर्यस्यास्ति तस्मै देवी प्रसीदति ॥ [२८]
शङ्कायां जायते ग्लानिः शङ्कायां दुःखभाजनम् ।

---

११ विहरन्ति– ग, घ ।
१२ पुरा– ग, घ ।
१३ °°विग्रहा– ग ।
१४ प्रयुक्तो– ग ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

शङ्कायां सिद्धिहानिः स्यान्निर्विकल्पं समाश्रयेत् ॥ [२९]

कर्तव्यं वाप्यकर्तव्यं नैव तत्र विचारयेत् ।
मयापि विष्णुना सार्द्धं ब्रह्मणा मुनिभिः सह ॥ [३०]

एकपात्रं गृहित्वा तु निर्विकल्पं यथाश्रिता ।
देवगन्धर्वदैत्याद्या रक्षपन्नगमानवाः[१५] ॥ [३१]

सप्तधातुभिः संक्लिन्ना[१६] मलमूत्राश्रवावहाः[१७] ।
तेषां कि तद्विचारेण निर्विकल्पं समाचरेत् ॥ [३२]

सूर्योदये किं तमांसि तिष्ठन्ति भुवनोदरे ।
तथा देव्याः प्रभावेण किमाचारं विचारयेत् ॥ [३३]

किं बहूक्तेन देवेशि गोपनीयं प्रयत्नतः[१८] ।
सर्वसिद्धिर्महेशानि गोपनीया प्रयत्नतः ॥ [३४]

प्रकटे मृत्युमाप्नोति सिद्धिहानिश्च जायते[१९] ।
यस्मिन्मन्त्रे यदाचारस्तत्र धर्मस्तु तादृशः ॥ [३५]

कृतार्थस्तेन जायेत स्वर्गो वा मोक्ष एव वा ।
नाधर्मो नैव पापादि जायते तत्क्रमेण च[२०] ॥ [३६]

किं च धर्मो महान् वापि पुण्यराशिः प्रवर्द्धते ।
शक्तौ सर्वसमुत्पन्नं[२१] यत्किञ्चिज्जगति गतम्[२२] ॥ [३७]

तस्माच्छुद्धमशुद्धं वा शक्तिब्रह्मस्वरूपकम्[२३] ।
सर्ववेदविदो विप्राः सदाचारेण सुव्रते ॥ [३८]

---

१५ *यक्षपन्नग°– ग ।*
१६ *संक्लिन्नैः– घ ।*
१७ *°°स्ववावहाः– घ ।*
१८ *सदैव हि– ग, घ ।*
१९ *सिद्धिहानिः प्रजायते – ग, घ ।*
२० *तु– ग, घ ।*
२१ *सर्वं°– ग, घ ।*
२२ *°°किञ्चिच्च गतागतम्– ग, घ ।*
२३ *शक्तिर्ब्रह्मस्वरूपकम्– घ ।*

CC-0. Nepal Sanskrit Academy, Kathmandu

